सन् भुवनं परिधावति । योगाचार्य्योमिताहारो दैत्यानामभवद्गुरुः" । तस्य नक्षत्रविशेषगत्या वर्षादिफलादिकम् वृ०सं०९अ०उक्तम् "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः । अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः । नागा तु पवनयाम्यानलानि पैतामहात्त्रिभात्त्रिस्त्रः । गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भाद्रपदे । जरद्गव्यां श्रवणात् त्रिभं मृगाद्यात् त्रिभं च मैत्राद्यम् । हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना । तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः । तासामप्युत्तरमध्यदक्षिणावस्थितैकैका । वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य । नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत् । उत्तरमार्गो याम्यादिर्निगदितो मध्यमस्तु भाग्याद्यः । दक्षिणमार्गोऽषाढादिः कैश्चिदेवं कृता मार्गाः । ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम् । स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ।

उत्तरवीथिषु शुक्रः सुभिक्षशिवकृद्गतोऽस्तमुदयं वा । मध्यासु मध्यफलदः कष्टफलो दक्षिणस्यासु । अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम् । कष्टतमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् । भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम् । वङ्गाङ्गमहिषवाह्लीककलिङ्गदेशेषु भयजननम् । अत्रोदितमारोहेद्ग्रहोऽपरो यदि सितं ततो हन्यात् । भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् । भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुशस्यसम्पत्त्यै । विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम् । अन्यनात्राक्रान्ते म्लेच्छाटविकाश्वजाविगोमन्तान् । गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति । विचरन् मघादिपञ्चकमुदितः शस्यप्रणाशकृच्छुक्रः । क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च । चित्राद्येऽवष्टब्धो हन्त्यथैनाविकाञ्छबरशूद्रान् । पुण्ड्रापरान्तशूलिकवनवासिद्रविडसामुद्रान् । स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम् । ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय । अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून् । प्रत्यन्तावन्तिपुलिन्दतङ्गणाञ्छूरसेनांश्च । ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं प्रबाधयते । काश्मीराश्मकमत्स्यान् सचारुदेवानवन्तींश्च । आरोहेऽत्राभीरान् द्रविडाम्बष्ठत्रिगर्तसौराष्ट्रान् । नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य बधः । षष्ठं षण्नक्षत्रं शुभमेतन्मण्डलं धनिष्ठाद्यम् । भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित् सभयम् । अत्रारोहे शूलिकगान्धरावन्तयः प्रपीड्यन्ते । वैदेहबधः, प्रत्यन्तयवनशकदासपरिवृद्धिः । अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम् । पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि । दृष्टोऽनस्तगतेऽर्के भयकृत् क्षुद्रोगकृत् समस्तमहः । अर्धदिवसं च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः । भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः । अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री । प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा । केशास्थिशकलशबला कापालमिव व्रतं धत्ते । सौम्योपगतो रसशस्यसङ्क्षयायोशनाः समुद्दिष्टः । आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः । अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः । पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च । अश्लेषासु भुजङ्गमदारुणपीडावहश्चरञ्छुक्रः । भिन्दन् मघां महामात्रदोषकृद्भूरिवृष्टिकरः । भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय । आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी । कौरवचित्रकराणां हस्ते पीडा जलस्य च निरोधः । कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः । स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः । ऐन्द्राग्न्येऽपि सुवृष्टिर्वणिजां च भयं विजानीयात् । मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः । मौलिकभिषजां मूले त्रिष्वपि चैतेष्वनावृष्टिः । आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति । श्रवणे श्रवणव्याधिः पाषण्डिभयं धनिष्ठासु । शतभिषजि शौण्डिकानामजैकपे द्यूतजीविनां पीडा । कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम् । अहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम् । अश्विन्यां हयपानां याम्ये तु किरातयवनानाम् । चतुर्दशे पञ्चदशे तथाष्टमे तमिस्रपक्षस्य तिथौ भृगोः सुतः । यदा व्रजेद्दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते । गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा । तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम् । यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्त्तिनः । नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः । न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग्नरता द्विजातयः । न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् । शनैश्चरे म्लेच्छबिड़ालकुञ्जराः खरा महिष्योऽसितधान्यशूकराः । पुलिन्दशूद्राश्च